# शिवोपासन मन्त्राः śivopāsana mantrāh

निधनपतये नमः

nidhanapataye̱ namaḥ

निधनपतान्तिकाय नमः

nidhanapatāntikāya̱ namaḥ

ऊर्ध्वाय नमः

ūrdhvāya̱ namaḥ

ऊर्ध्वलिङ्गाय नमः

ūrdhvaliṅgāya̱ namaḥ

हिरण्याय नमः

hiraṇyāya̱ namaḥ

हिरण्यलिङ्गाय नमः

hiraṇyaliṅgāya̱ namaḥ

सुवर्णाय नमः

suvarṇāya̱ namaḥ

सुवर्णलिङ्गाय नमः

suvarṇaliṅgāya̱ namaḥ

दिव्याय नमः

divyāya̱ namaḥ

**śivopāsana mantrā**

दिव्यलिङ्गाय नमः

divyaliṅgāya̱ namaḥ

भवाय नमः

bhavāya namaḥ

भवलिङ्गाय नमः

bhavaliṅgāya̱ namaḥ

शर्वाय नमः

śarvāya̱ namaḥ

शर्वलिङ्गाय नमः

śarvaliṅgāya̱ namaḥ

शिवाय नमः

śivāya̱ namaḥ

शिवलिङ्गाय नमः

śivaliṅgāya̱ namaḥ

ज्वलाय नमः

jvalāya̱ namaḥ

ज्वललिङ्गाय नमः

jvalaliṅgāya̱ namaḥ

आत्माय नमः

ātmāya̱ namaḥ

**śivopāsana mantrā**

आत्मलिङ्गाय नमः

ātmaliṅgāya̱ namaḥ

परमाय नमः

paramāya̱ namaḥ

परमलिङ्गाय नमः

paramaliṅgāya̱ namaḥ

एतथ्सोमस्य सूर्यस्य सर्वलिङ्गग्ग् स्थापयति पाणिमन्त्रं पवित्रम्।

etathsomasya sūryasya sarvaliṅgagg sthāpayati pāṇimantraṁ pavitram।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।

भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥

sa̱dyojā̱taṁ prapadyā̱mi̱ sa̱dyojā̱tāya vai namo̱ namaḥ । bha̱ve bhave̱ nātibhave bhavasva̱ mām । bha̱vodbhavāya̱ namaḥ ॥

वामदेवाय नमो ॥

vā̱ma̱devāya̱ namo ॥

ज्येष्ठाय नम ॥

jye̱ṣṭhāya̱ nama ॥

श्श्रेष्ठाय नमो ॥

śśre̱ṣṭhāya̱ namo ॥

**śivopāsana mantrā**

रुद्राय नमः ॥

rudrāya namaḥ ||

कालाय नमः ॥

kālāya namaḥ ||

कलविकरणाय नमो ॥

kalavikaraṇāya namo ||

बलविकरणाय नमो ॥

balavikaraṇāya namo ||

बलाय नमो ॥

balāya namo ||

बलप्रमथनाय नम ॥

balapramathanāya nama ||

स्सर्व-भूतदमनाय नमो ॥

ssarvabhūta damanāya namo ||

मनोन्मनाय नमः ॥

manonmanāya namaḥ ||

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

aghorebhyo'tha ghorebhyo ghora ghoratarebhyaḥ |
sarvebhya-ssarvaśarvebhyo namaste astu rudrarūpebhyaḥ ||

**śivopāsana mantrā**

तत्पुरुषाय विद्महे  महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।

tatpuruṣāya vidmahe  mahādevāya dhīmahi | tanno rudraḥ pracodayāt |

ईशान-स्सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्माऽधिपति-र्ब्रह्मणोऽधि-पतिऽर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

īśāna-ssarva-vidyānā-mīśvara-ssarva-bhūtānāṁ brahmā' dhipatir brahmaṇo'dhipati'r brahmā śivo me astu sadāśivom ||

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरुपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥

namo hiraṇyabāhave hiraṇyavarṇāya hiraṇyarupāya hiraṇyapataye'mbikāpataya umāpataye paśupataye namo namaḥ ||

ऋतगं॒ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ṛtagṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇapiṅgalam |

उध्वरेतं विरुपाक्षं विश्वरुपाय वै नमो नमः ॥

urdhvaretaṁ virupākṣaṁ viśvarupāya vai namo namaḥ ||

सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु ।

sarvo vai rudra-stasmai rudrāya namo astu |

**śivopāsana mantrā**

पुरुषो वै रुद्र-स्सन्महो नमो नमः ।

puruṣo vai rudra-ssanmaho namo namaḥ ।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।

viśvaṁ bhūtaṁ bhuvanaṁ citraṁ bahudhā jātaṁ jāyamānaṁ ca yat ।

सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ।

sarvo hyeṣa rudra-stasmai rudrāya namo astu ।

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमगं् हृदे ।

kadrudāya pracetase mīḍhuṣṭamāya tavyase । vocema śantamagṁ hṛde ।

सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

sarvo hyeṣa rudra-stasmai rudrāya namo astu ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ॥

---

* * * * * * * * * *

---